संहर्त्री शुम्भनिशुम्भघातिनी मधुकैटभमर्दिनी॥
चण्डमुण्डमथिनी मां पायाच्छरणागतम्॥३६॥
स्वरूपा कामरूपिणी ह्रींकारी चामुण्डा बीजरूपिणी॥
वागीश्वरी वागीश्वरी हुंकारी मां पायाज्जगदम्बिका॥३७॥
सकलजनपूज्या भवानी जन्मनाशिनी॥
प्रपन्नार्तिहरी देवी पातु मां भक्तवत्सला॥३८॥
मन्त्ररूप ॐ ह्रीं क्लीं देवी त्वं बीजाक्षरनिवासिनी॥
दुर्गतिहारिणी दुर्गा पातु मामभयंकरी॥३९॥
पापघ्नी गिरिजा गिरिवासिनी कात्यायनी कलात्मिका
काली भद्रा महाकाली मां सदा समवतु॥४०॥

२८१३

(४३)

श्रीदुर्गास्तोत्रम् ॥

पावकी पावती दुर्गा गायत्री सावित्री तथा ॥
सरस्वती महालक्ष्मी सिद्धलक्ष्मी सदावतु ॥४१॥
मोक्षप्राची महादेवी विराड्रूपा तु वैष्णवी ॥
कालरात्री कालस्वरूपा प्रसीद भुवनेश्वरी ॥४२॥
दुर्गतिं हरतु दुर्गा रोगं च रोगनाशिनी ॥ सरस्वती
भयं हरतु भवानी कुबुद्धिं च बुद्धिप्रदा ॥४३॥
ॐ ऐं ह्रीं श्रीं क्लीं स्वरूपा हारीपर्वतवासिनी ॥
हारीस्वरूपा सर्वत्र मां पायाच्छारिका सदा ॥४४॥
उमा गौरी पार्वती च शारदा हंसवाहिनी ॥
जाड्यापहारिणी देवी रक्षतु शारदा स्वयम् ॥४५॥
अद्यां महान्तां प्रकृत्यभिधानाम् महाप्रकृति नामदेयां
गुणात्मिकां चाखिल देववन्द्याम् ॥
निराश्रयां त्रिगुणसमन्वितां सदीगुणां
नतोऽस्मि देवीं सुरैः सुपूजिताम् ॥४६॥
सर्वत्रगां सूक्ष्मतनुं विचित्रां नैर्गुण्यां तथा ॥
जन्मविनाशहीनां च नतोऽस्मि जगदम्बिकाम् ॥
+ ... जरा जापूर्ही ... ॥४७॥

दुर्गास्तोत्रम् ॥

वेधूरी मन्मेश्वरीम्

अनन्तशक्तिमयीं देवीं जगत्प्रसूतिनीं सदा।

गौ

आनन्दमात्रां शुद्धां च सदा शरणं प्रपद्ये ॥४८॥

प्रयत्नेन शरणं

यस्यां व्यस्तमति र्याति नरकं न कदाचित् ॥

सदा

यत्स्मरणे भवेत्स्वर्गं तां देवीं प्रणमाम्यहम् ॥४९॥

स्मरणात्

तां नमामि महेशानीं देवीं देवभयापहाम् ॥

भवेत्

सम्मोहेन

रूपां केशीं शोभमानां शुभाननाम् ॥५०॥

महाबलां महादेवीं परमां परमेश्वरीम् ॥

कालीं

भगवतीं भवानीं दुर्गां वन्देऽहं तां शिवां सदा ॥५१॥

शान्तिदं

नमस्तेऽस्तु नारायणि नमस्ते प्रहीणशोके ॥

हे

नमो भगवति देवि दुर्गायै ते नमो नमः ॥५२॥

कृतचित्

न दृष्टः सुखदो मार्गो यत्किञ्चिद् भुवनतले ॥

जगतीतले

देवीचरित्रश्रवणः सन्मार्गः कथितो बुधैः ॥५३॥

शिवप्रिया वृषारूढा दैत्यघ्नी सिंहवाहिनी ॥

शिवा शान्ता कल्याणी सा पातु मां शिववल्लभा ॥५४॥

दैत्यदानवसंहर्त्री भक्तानां तु वरप्रदा ॥

दयापूर्णा दयाकर्त्री रक्ष मां भक्तवत्सले ॥५५॥

दुर्गास्तोत्रम् ॥

~~देवारीजोसे~~ १ देवरिगम सं हुत्री

चण्डरूप धरा गौरी चण्डमुण्डविनाशिनी ॥
~~परशुधस चामुण्डा~~ मां मम भयंकरी ॥५९॥
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे मन्त्रस्वरूपिणी ॥
देवाशीणां निहं ग्रीय मां पातु चामुण्डा सदा ॥५७॥
धूर्जटेः पत्नी देवी त्वं धूर्जटेः प्राणवल्लभा ॥
महामाया महादेवी पातु मां शरणागतम् ॥५८॥
शिवा शिवस्वरूपा च शिवस्य सहचारिणी ॥
शिवसेवानिरता च पातु मां शैलजा सदा ॥५९॥
नराणां नारकीपीडा ~~पहस्नीपी~~ स सर्वदा ॥
नृमुण्डमाला धरा मां रक्ष नरवाहिनी ॥६०॥
उमा नाम्ना विख्याता पुर्यां सुमानिवासिनी ॥
नागमध्ये विराजिता देवी रक्षतु मां सदा ॥६१॥
मूर्त्तिपूंक रूपे यस्याः ~~सेवन~~ प्रमाविभाति सर्वदा ॥ धारयते
सु मङ्गलप्रदा देवी सा मां रक्षतु शाङ्करी ॥६२॥
वितस्ततटनिकटे नागमध्ये विराजिता ॥
कालीकरालवदना ~~महा~~ काली मां रक्षतु ॥६३॥ सदा

(left margin, vertical) एवं प्रदक्षिणा ... छापयंत्रं ... प्र.

(४६)

+ दुर्गास्तोत्रम् ॥ +

शान्तघोरःस्वरूपाभ्यां सुशालिनी

शैलजा शैलवासिनी शैलपुत्री च शीलिनी॥

श्यामा क्षमा शूलिनीच हैमां रक्षतु प्राणिप्रदा॥ ६४॥

मूलं वर्ती भार्या

इत्येवं निर्मितं स्तोत्रं देव्याः पदार्पितं तु वै॥

यः श्रद्धया पठेन्नित्यं प्राप्नुयात्सिद्धिमुत्तमाम्॥ ६५॥

स्मर्त्रं हुण्डूजातीयार्जुनोऽहं भक्तिश्रद्धासमन्विताम्॥

मन्दबुद्ध्या ~~यदि कापि त्रुटि~~ कृतं ~~समा~~ रसु क्षमये॥

॥ ६६॥

इति श्री जगदम्बायाः हुण्डूजातीयार्जुनेन निर्मितं चतुर्वर्गफलप्रदं रोगारिष्टभयहे कष्टनिवारकं स्तोत्रं सम्पूर्णं समाप्तम् ॥ ॐ॥

हुंडूजातीयार्जुनोऽहं भक्तिश्रद्धसमन्वितः
मन्दबुद्ध्या स्तोत्रमिदं कृतं क्षमस्व नृतम्

अयोध्याधिनाथं रघुकुल हुताथं
सुन्दरं

श्री शारिकां त्रिनयनां भगिभुजा
भालां काश्मीरभय हारिबलेन शृंगु
संध्यां खड्ग त्रिशूल पाश चाप वज्री
चिन्तयेऽहं सर्वोपकारीं फलदां जननी
प्रणौमि र शान्ति स्वरूपां परमे
श्वरीं परां जगदि राजराजेश्वरीं वरदां
सुरतपदां भक्तदुःखार्ति हारिणीं
श्यामां सुभामां शिरसा नमामि
शान्ति स्वरूपां जनशान्तिदां शिवां
भक्तिस्वरूपां निजभक्तिदां सुमामू
पां चिन्तये तां गिरिराज पुत्री
वन्दे सदाऽहं परमेश्वरप्रियाम्
दुःखार्तोऽहं भवानि त्वद चरण कंगं हारि भजे
नमः श्लोकैः चिन्ते तव चरणध्यानं सुखाश्रितं
सदा [illegible] सदा

नवाघ्रिद्वन्द्वे भवतु व्यसनमभीन
विद्धेः शिरहं मन्दो देवि चरणध्यानसम
लभं तन्त्रे ; पथ्येयं नव चरणयुग्मं
कथमुमे निकृष्टस्त्वद्देहं कथय कथं
यास्यामि गिरिजे पराधीनो मातस्तव
चरणाचिन्तास्तु हृदि मे ॥
३० भवानी विश्वेशी सकलभुवनपालन-
परा जगन्माता देवी भजनपरभक्ताघहारिणी
भयात्रातुं प्राक् नहि मम दृष्टोऽगोचरमतः
कथं त्वत्पादौ ननु निजवयास्येन्य धाम्नम् ३०
आदित्याभाकाशात्तन प्रसूनं दीदेप्यमानं सारिताः
धूम्रमीभू प्रकाशपुञ्जं धारणं धारणं तं दीप्रिभञ्जं
धारणा धपद्धो १ प्रत्यक्षं देवं सकलामयघ्नं
मरीचिपौत्रं कमलासनस्थम् सदाष्टवाहुं
चिदप्राभि वन्द्यं त्रिविधरूपेशं हृदि भावयामि
प्रत्यक्षदेवं चिरपौ नीयमानं द्वादशस्वरूपं किरणै
स्वपतामूं कोटिश्च पूजनं स्वामिनप्रभु कालाद्यी

पार्श्वं भजन्स्तोम्नरामि।। विष्णुं महेशं करुणा
कारं परम नजनमनादिमव्ययं मोऽव्ययम्
प्राणस्वरूपं जगदीश्वरं विभुं नमामि
देवं त्रैजगन्नाथं हरिमूर पुराणाकारं
नागराजोपविष्टं श्रीलक्ष्माङ्कं श्रीचरं तुलसी
धूमूगन्धं शंखं चक्रपद्मे चहृनं निधान
न्दं नौमि नित्यं सुरेशम्।। ~~श्रीमत्सोच्या~~
पुरीश्वरं रिपुकालमर्दं सर्वं रामपूर्णं - श्यामं
श्लोक श्रीरामचन्द्रं रिपुकालभीमं [मर्यादं] सदा सुप्रसन्नं
श्रीपूर्णं सुचारु कार्यं रघुकुलमिनदं भ्रातृभिः
सेव्यमानं भूपिताजान्यना वाग्यं सकल
जनप्रियं पावनं निधानमूर्तिं सुग्रीवयत्न
लब्ध राज्यं प्रजा निमग्न वरदं जानकीशं नमामि
राजीवपत्र नयनं भजे वृन्दवृन्दं मच्चित्तगेह
स्त्रं रघुभूषण भव्याद्रि वज्रभ्रमापहं माधवाविपुण्यं
रादि चन्द्रनेत्रं योगीन्द्रसेवितपदं भगवन्त
मीडे।।

दिव्यमन्त्र
२

वैदेही प्राणनाथं मुनिगण वरदं लक्ष्मणेसेव्यमानं
श्यामं सुचारुकायं रघुकुल तिलकं भक्तहृत्कञ्जभृङ्गम्
वंशीवृक्षप्रसूनं सकल जन प्रियं भजामो सूनु सेव्यं
उग्रीलबद्ध सरव्यं रिपुकुल दहनं राम चन्द्रं नमामि
त्रिजां सुरेशं त्रिजगत्पतिं विभुं
ध्यानस्वरूपं गरुडध्वजं वरम् पूर्ण नाम सादिमज्जं
मध्यान्त नमामि देवं त्रिजगत्पतिं प्रभुम्
मुक्ति भक्त कारिद्धी प्रलम्ब शान्ताकारं नागयज्ञोपवीतं
गदां शंखं चक्र पद्मं ज दहनम् श्रीवत्साङ्कं श्रीधरं
तुलसीभृत् नित्यानन्दं भजमो नौमि नित्यम्॥
प्रसादं विश्वानिधि विदिधा दुःख पूर्ण मयपदं
दुराचिग्रस्तोहं कथमहं तारिष्यामि वरदामू
रवल स्पटौ नस्या विषय मृगणा क्रान्तमनस:
न जाने को वस्था मम व्यसनमस नश्य भवति
प्रभुं ने नमामि पूर्णे सार्वं मल्या चेया कुनम्
श्री कान्त स्वभक्त प्रिय सदानन्द करुणार्णव

58

मन्त्र वृद्धाशुं किंजयन्स्तोत्रं सूत्रे मणिमिव
वाञ्छितार्थप्रदं ~~[illegible]~~ भक्त्यापूर्वसं तोषकारकम्

२ मई १९५१ संवत् ५०२७ अधिक
वैशाख कृष्ण पक्ष तृतीयस्यां गुरौ
७ बजे २ मिनट प्रातः काल
तेजकृष्ण पुत्रः

वसन्त जोगीलंकरे मन्तर
जोगीलंकर सद्मनि

ॐ श्रीमन्महागणेशाय नमः (1)

अथ श्रीगुरुस्तुतिः

श्रीगुरुवरचरणेभ्यः

साञ्जलिः प्रणतिः॥

श्रीगुरुं ब्रह्मतत्त्वज्ञं जपध्यानपरायणम्॥
वेदज्ञं भगवद्भक्तं वन्देऽहं सद्गुरुं सदा॥१॥
जितेन्द्रियं जितक्रोधं पूजाध्यानपरायणम्॥
सर्वज्ञं धर्ममर्मज्ञं वन्देऽहं सद्गुरुं सदा॥२॥
निर्वैरं निर्ममं दिव्यं ज्ञानविज्ञानसागरम्॥
निरामयं ज्ञानमूर्तिं वन्देऽहं सद्गुरुं सदा॥३॥
दयानिधिं स्नेहमूर्तिं दम्भदर्पादिवर्जितम्॥
सदाचारं दयावन्तं वन्देऽहं सद्गुरुं सदा॥४॥
महात्मानं च परमं सर्वशास्त्रविशारदम्॥
बलभद्रसुतं शुद्धं वन्देऽहं सद्गुरुं सदा॥५॥
महाविशुद्धविज्ञानं पवित्रशुद्धमानसम्॥
लोकहितकरं शुद्धं वन्देऽहं सद्गुरुं सदा॥६॥
सूपदेशाकरं ख्यातं सद्गुणैश्च सुशोभितम्॥
धर्मज्ञानार्थतत्त्वज्ञं वन्देऽहं सद्गुरुं सदा॥७॥
रैणादित्यवाटिकायां वसन्तं मध्यसद्मनि॥

हं सन्तं च प्रियकरं वन्देऽहं सद्गुरुं सदा॥८॥

(2)

श्री गुरु स्तुति!

पीताम्बरं गुरुवरं हुल्कूपाह्वं गुणाश्रयम्।
विशुद्धं धर्मपरं वन्देऽहं सद्गुरुं सदा॥१॥
दयाकटाक्षाभिलाषी प्रपन्नो नतमस्तकः।
श्रीगुरुचरणौ वन्दे सदाहमर्जुनाभिधः॥२॥
ॐ श्री परमपूजनीयाय गुरवे नमः॥

अथ श्रीगणेशस्तुतिः

(३)

ॐ नमामि विघ्नौघहरं गणेशं,
देवादिदेवं गणनायकं च॥
सुखप्रदं धर्मविदां वरेण्यं
गौरीसुतं तं मनसा स्मरामि॥१॥
सिन्दूरवर्णं गजराजवक्त्रं
लम्बोदरं विघ्नहरं महेशम्॥
नागेन्द्रहारं परमं पवित्रं
तमादिदेवं सततं नमामि॥२॥
नमोऽस्तु ते मूषकवाहनाय,
नमोऽस्तु ते विघ्नविनाशकाय॥
नमोऽस्तु ते भक्तभयापहाय,
नमोऽस्तु ते भक्तवरप्रदाय॥३॥
गणाग्रगण्यं गणसेवितांघ्रिं
गजाननं चामरैः सुपूजितम्॥
दुःखार्तैः सेवितपादपद्मं
तं विघ्नराजं शिरसा नमामि॥४॥

नमो नमो गणेशाय भयहर्त्रे नमो नमः ॥
गौरीपुत्राय देवाय, शरण्याय नमो नमः ॥५॥
हेरम्बाय महेशाय विघ्नविध्वंसकारिणे ॥
सर्वनेत्राधिवासाय गणानां पतये नमः ॥६॥
विश्वकर्त्रे विश्वहर्त्रे विश्वकारणहेतवे ॥
विश्वापत्तिविनाशाय विश्वेशाय नमो नमः ॥७॥
विश्वभयविनाशाय विश्वमङ्गलहेतवे ॥
विश्वपूजितपादाय विश्वार्च्ये च ते नमः ॥८॥
वक्रतुण्डाय शुभ्राय स्कन्दज्येष्ठाय ते नमः ॥
एकदन्ताय मध्याय चतुर्दन्ताय वै नमः ॥९॥
गजवक्त्रं महाबाहुं लड्डुकपात्रहस्तकम् ॥
लम्बोदरं शूर्पकर्णं गणेशं प्रणमाम्यहम् ॥१०॥
वराभय करं देवं परशुपाशधारिणम् ॥
सिन्दूरवर्णसङ्गात्रं गणेशं प्रणमाम्यहम् ॥११॥
सोमसूर्याग्निप्रभं च नागयज्ञोपवीतिनम्
सर्वप्रियंकरं देवं गणेशं प्रणमाम्यहम् ॥१२॥

गणाधिपं सर्वपूज्यं पार्वतीप्रियपुत्रकम्॥
षोडशाक्षरमंत्रस्य जपतुष्टं नमाम्यहम्॥१३॥
गौरी ~~प्रियं~~ पुत्रं शिवप्रियं विघ्नेशं च विनायकम्।
गजतुण्डधरं देवं वन्दे तं विघ्नहारिणम्॥१४॥
सिद्धहस्तं सिद्धिप्रदं सर्वयज्ञसुसिद्धिदम्॥
प्रणवरूपिणं देवं प्रणमामि फलप्रदम्॥१५॥
ॐ ह्रीं श्रीं क्लीं ग्लौं गीं गं गः गणपतये नमः ॐ॥
मंत्रराजं जपामह क्रमभक्तसत्फलदं विभुम्॥१६॥
विघ्ननिवारणदक्षं मोक्षदं प्रणमाम्यहम्॥
स्थूलकायं महात्मानं वन्देऽहं कार्यसिद्धिदम्॥१७॥
द्वीपरक्षाकरं नित्यं क्षेत्रेशं विजयप्रदम्॥
अमोघसिद्धिदं मीशं गणेशं प्रणमाम्यहम्॥१८॥
कामरूपं देववन्द्यं दुर्जेयं गजकर्णकम्॥
निम्ननाभिं पीनकुक्षिं विघ्नराजं नमाम्यहम्॥१९॥
इक्षुचापधरं वीरमक्षमालाविभूषितम्॥
धनदं विजयाध्यक्षं स्थूलवक्षं ~~नम~~
नमाम्यहम्॥२०

वरेण्यं वरधातारं वन्दे भयनिवारकम्॥
कीर्तिदं शोकहन्तारं विघ्नरूपं प्रणमाम्यहम्॥२१॥
गणेश्वरं गणक्रीडं गणानामधिपं प्रभुम्॥
गणाध्यक्षं श्रीगणेशं गणश्रेष्ठं नमाम्यहम्॥२२॥
कामरूपं कामगतिं कामदं सुकृपापरम्॥
कामज्ञं कामनानाथं कामेश्वरं नमाम्यहम्॥२३॥
कमण्डलुधरं देवं मोदकपात्रहस्तकम्॥
दन्तपाणिं लड्डुकादं वन्देऽहं मोदकप्रियम्॥२४
चतुर्मुखं चतुर्बाहुं त्रिनेत्रं नागधारिणम्॥
चतुर्थीतिथिसम्भूतं वन्दे संकष्टनाशकम्॥२५॥
नागाननं भालचन्द्रं स्थूलकायं मनोहरम्॥
एकदन्तं महावीर्यं वन्दे तं द्विरदाननम्॥२६॥
कारुण्यं च शरण्यं च सदैव विजयप्रदम्॥
अनाधारं विभुं देवं वन्दे तं कर्मसाक्षिणम्॥२७॥
विधातारं च धातारं भक्तिलभ्यं सुयाज्ञिकम्॥
विघ्नराजं भूतिप्रदं स्वतन्त्रं तं नमाम्यहम्॥२८॥

सकलं निष्कलं देवं सर्वज्ञं सर्वभेषजम्॥
गजराजं गजमुखं देवदेवं नमाम्यहम्॥२९॥
स्कन्दप्रियं सारभूतं भक्तविघ्न ~~कल्म~~ विनाशकम्॥
तेजस्विनं दीप्तिमन्तं योगगम्यं नमाम्यहम्॥३०
ब्रह्मरूपं ब्रह्मपरं ब्रह्मण्यं ब्राह्मणप्रियम्॥
ब्रह्मज्ञं ब्रह्मतत्त्वज्ञं वन्दे तं ब्रह्मचारिणम्॥३१॥
इत्थं स्तुतिं मया प्रोक्तां प्रपाल्तां मन्दबुद्धिना॥
सर्वविघ्नहरां नूनं वाञ्छितार्थफलप्रदाम्॥३२॥
~~अर्जुननाथेन रचितं [illegible] गणेशस्य स्तव~~
अर्जुननाथेन रचितं गणेशस्य महात्मनः॥
स्तोत्रं कार्यसिद्धिकरं सर्वविघ्नहरं नृणाम्॥३३॥
यः पठेत्प्रातरुत्थाय भक्तिभावेन नित्यशः॥
स लभे द्वाञ्छितं कामं गणेशस्य प्रसादतः॥३४॥
ॐ इति हण्डूजातीयेनार्जुनेन निर्मितं
सर्वसिद्धिकरं अभीष्टफलप्रदं ~~[illegible]~~ सर्ववि-
घ्नहरं ~~[illegible]~~ गणेशस्तोत्रं सम्पूर्णं समाप्तम्॥

ॐ

(५)

अथ श्रीविष्णुस्तुतिः।

विष्णुं महेशं करुणाकरं परं
प्रशान्तस्वरूपं जगदीश्वरं वरम्॥
अनन्तमनादिमजमव्यक्तं च
नमामि देवं त्रिजगत्पतिं विभुम्॥१॥
श्यामं प्रशान्ताकारं नागराजोपविष्टं
गदां शङ्खं चक्रं पद्मं दधन्तं सदा॥
श्रीवत्साङ्कं श्रीशं तुलसीशं पावनं
नित्यं नित्यानन्दं [illegible] मनसा नौमि रामम्
शुश्रूषमाणोऽर्थनाथं दैत्यकुलभयदं सर्वदा सुप्रसन्नं
रामं सुचारुकायं रघुकुलतिलकं भ्रातृभिः सेव्यमानम्॥
दिव्यात्तात्यक्तराज्यं सकलप्रियकरं सानुजं राघवेन्द्रं
ध्यायं देवैः प्रपन्नं रिपुकुलदवनं सौख्यदं रामचन्द्रम्॥
प्रसीद देववंदितेश! प्रसीद परमेश्वर! ॥
प्रसीद नृपसत्पुत्र! प्रसीद जगदीश्वर! ॥४॥
जगन्निवासं सुखदं राममहं रमापतिम्॥
नारायणं कृपासिन्धुं वन्देऽहं रविवंशजम्॥५॥

परमेष्ठं देवदेवं ज्ञानगम्यं निराश्रयम्॥
परं विभुं सौम्यरूपं वन्दे तं जगदीश्वरम्॥६॥
योगप्रियं योगगम्यं योगिभ्यश्च निर्वाणदम्॥
योगिभिरर्चितं विष्णुं वन्देऽहं तं योगीश्वरम्॥७॥
श्रीनिधिं श्रीधरं श्रीशं सदा श्रीपादसेवितम्॥
श्रीकरं श्रीवत्साङ्कं च वन्देऽहं तं श्रियः पतिम्॥८॥
वेदवेद्यं वेदसारं दुर्ज्ञेयं स्वप्रकाशकम्॥
भवरोगप्रशमनं वन्देऽहं जगदीश्वरम्॥९॥
सर्वपूज्यं सर्वसारं सर्वदं सर्वतोमुखम्॥
सर्वदुःखहरं सेव्यं वन्दे तं जगदीश्वरम्॥१०॥
सर्वजनकं सर्वेशं सर्वस्वं सर्वव्यापिनम्॥
सर्वहितकरं देवं वन्दे तं जगदीश्वरम्॥११॥
सृष्टिस्थितिनाशकरं सदा ध्यानपरायणम्॥
शान्तं चराचरपतिं वन्दे तं जगदीश्वरम्॥१२॥
सगुणं निर्गुणं नित्यं निरंजनं निरास्पदम्॥
त्रिगुणातीतं सत्वस्थं वन्देऽहं जगदीश्वरम्॥१३॥

परमब्रह्म स्वरूपं परेष्ठं परमास्पदम्॥
परमं परमेष्ठानं वन्दे तं जगदीश्वरम्॥१४॥
सनातनं सत्यदेवं सत्यरूपं सत्यात्मकम्॥
सत्यं समार्चितपदं वन्देऽहं तं सत्येश्वरम्॥१५॥
तेजस्स्वरूपं तेजोदं तेजस्विनं रमापतिम्॥
तेजसा सूर्यसङ्काशं वन्दे तं जगदीश्वरम्॥१६॥
सर्वस्वरूपं सर्वज्ञं सर्वानन्दकरं विभुम्॥
सर्वबीजमयं सर्वं वन्देऽहं जगदीश्वरम्॥१७॥
सर्वाश्रयं निराधारं सर्वास्पदं निरामयम्॥
सर्वादिं च सर्वज्ञं च वन्देऽहं जगदीश्वरम्॥१८
सर्वमङ्गलायतनं सर्वकारणकारणम्॥
प्रत्यक्षं सर्वतोभद्रं वन्देऽहं जगदीश्वरम्॥१९॥
एकं देवं महारुद्रं समस्थं सर्वव्यापिनम्।
कर्माध्यक्षं कामप्रदं वन्दे तं जगदीश्वरम् ।२०
सर्वभूतकृतावासं साक्षिणं सकलप्रियम्।
स्वामिनं त्रिजगदीशं वन्दे तं जगदीश्वरम्॥२१॥

नरसिंहं बृहत्कायं दैत्यघ्नं भक्तवत्सलम् ॥
प्रह्लादभीतिहन्तारं वन्दे तं जगदीश्वरम् ॥२२॥
भवदुःखहरं देवं बलिराज्यहरं विभुम् ॥
त्रिपद्भूमियाचतारं वन्दे वामनरूपिणम् ॥२३॥
पित्राज्ञामातृहन्तारं क्षत्रियघ्नं महाबलम् ॥
परशुधरमजेयं वन्दे तं भृगुनन्दनम् ॥२४॥
श्रीरामं भरतज्येष्ठं सदा सीतानिषेवितम् ॥
शत्रुघ्नलक्ष्मणसेव्यं वन्दे तं रघुनन्दनम् ॥२५॥
दशरथात्मजं देवं कौशल्यानन्दवर्धकम् ॥
भूभारहरणासक्तं वन्देऽहं रघुवंशजम् ॥२६॥
ताटकावधकर्तारं कौशिकयज्ञरक्षकम् ॥
सुग्रीवभ्रातृहं वीरं वन्दे तं बालिमर्दकम् ॥२७॥
अहल्योद्धारकं देवं कैवर्तकमुक्तिप्रदम् ॥
कृपापरं महात्मानं वन्दे तं करुणापरम् ॥२८॥
सौम्यरूपं हास्यमुखं मनःपंकजवासिनम् ॥
सर्वजनमोहकरं वन्दे भुविपर्यटकम् ॥२९॥

मिथिलाधिपसंसदे वै धनुर्भङ्ग विधायकम्॥
नृपाभिमानदर्पघ्नं वन्दे तं श्रीधनुर्धरम्॥३०
सीतया विहितोद्वाहं विवाहविधिपूर्वकम्॥
कमलनयनं रामं वन्दे तं जगदीश्वरम्॥३१॥
अयोध्यां प्रतिगच्छन्तं सभ्रातृमातृपितृकम्॥
रामनेत्रहुकं श्रीरामं वन्देऽहं सीतयान्वितम्॥३२॥
तेजस्विनं कृतदारं रामं पद्मनिभेक्षणम्॥
पित्राज्ञापालकं वीरं वन्देऽहं जगदीश्वरम्॥३३॥
पित्रादेशानुसारेण वनगमनप्रस्थितम्॥
सत्यव्रतं रामचन्द्रं वन्देऽहं जगदीश्वरम्॥३४॥
कौशल्यानन्दनं धीरं भारद्वाजाश्रमस्थितम्॥
तपस्विनं मिताहारं वन्देऽहं जगदीश्वरम्॥३५॥
दैत्यकुलनिहन्तारं दण्डकारण्यचारिणम्॥
जटायुमुक्तिदं देवं वन्दे तं रघुनन्दनम्॥३६॥
सीताहरणदुःखार्तं विचरन्तं वनाद्वनम्॥
राजीवलोचनं रामं वन्देऽहं जगदीश्वरम्॥३७॥

दण्डकारण्यचारिणं विराधदैत्यनाशकम्॥
रमानाथं मारीचघ्नं वन्दे जटायुमुक्तिदम्॥३८
दीनोद्धारकरं देवं ध्वारण्याघहरं प्रभुम्॥
शबरीमोक्षदातारं वन्दे तं करुणापरम्॥३९॥
सुग्रीवमित्रं वरदं हनुमत्पादसेवितम्॥
वानराध्यक्षहन्तारं वन्दे सुग्रीवराज्यदम्॥४०॥
सीतान्वेषणसंलग्नं सीताया विरहातुरम्॥
रोरुदन्तं रामचन्द्रं वन्दे सीतापतिं प्रभुम्॥४१॥
समुद्रतीरस्थकृताधिवासः
स्वयं रमेशः करुणानिधिः प्रियाकम्॥
भक्त्याचितं दामकामदं विभुम्
रमेश्वराख्यं भवबन्धमोचकम्॥४२॥
दशास्कन्धनिहन्तारं कुम्भकर्णनिषूदकम्॥
विभीषणराज्यप्रदं वन्दे तं जानकीप्रियम्॥४३
सीतया सहितं रामं भरतप्रियकारकम्॥
सशत्रुघ्नं ससौमित्रं वन्देऽयोध्यपतिं विभुम्॥
॥४४॥

करुणापूर्णनयनं दयालुं विश्वरक्षिकम्॥
भक्तानां वरदं देवं वन्दे तं जगदीश्वरम्॥४५॥
मङ्गलं मङ्गलप्रदं पीतवस्त्रं चतुर्भुजम्॥
कृपालुं दीनदैन्यघ्नं वन्दे तं जगदीश्वरम्॥४६॥
शान्ताकारं श्वेतवर्णं वनमालासुशोभितम्॥
पयोधरसमाकारं वन्देऽहं जगदीश्वरम्॥४७॥
शङ्खचक्रधरं नित्यं गदापद्मविभूषितम्॥
श्रीवत्सवक्षसं विष्णुं वन्देऽहं जगदीश्वरम्॥४८॥
आदिमध्यान्तरहितं व्यक्ताव्यक्तं निरंजनम्॥
अगोचरमनिर्वाच्यं वन्देऽहं जगदीश्वरम्॥४९॥
श्यामवर्णं त्रिनेत्रं च लक्ष्मीपादकृतार्चनम्॥
अजास्यं ध्यानमग्नं वन्दे तं जगदीश्वरम्॥५०॥
पुराणपुरुषं पूर्णं प्रत्यक्षं पुरुषोत्तमम्॥
प्रद्युम्नं परमात्मानं वन्दे तं जगदीश्वरम्॥५१॥
सर्वदेवमयमीशं सर्वदेवप्रियं हरिम्॥
सर्वपापप्रशमनं वन्दे तं जगदीश्वरम्॥५२

विश्वाधारं विश्वरूपं विश्वरक्षापरं सदा॥
विश्वम्भरं विश्ववासं वन्देऽहं विश्वस्वामिनम्॥४३
शान्तस्वरूपं परमप्रकाशं
इन्द्रादिदेवगणसंस्तुतं च॥
नारायणं तं पन्नगोपाविष्टं
सुदीर्घबाहुं प्रणमामि विष्णुम्॥४४॥
भवभीतिनिहन्तारं सर्वजीवप्राणिरक्षकम्॥
भवसागरनिस्तारकं वन्दे तं जगदीश्वरम्॥४५॥
आर्तानामार्तिहन्तारं भीतानां भयनाशकम्॥
दीनानां दैन्यहन्तारं वन्देऽहं दीनवत्सलम्॥४६
वसुदेवप्रियपुत्रं देवकीहर्षवर्धकम्॥
यदुवंशोद्भवं कृष्णं वन्दे तं जगदीश्वरम्॥४७॥
यशोदानन्ददं बालं नन्दगोपसुखकरम्॥
बालक्रीडाखेलयुक्तं वन्दे गोपीप्रियं हरिम्॥४८।
विश्वात्मानं वासुदेवं परानन्दं परात्परम्॥
राधाप्रियं रमानाथं वन्देऽहं जगदीश्वरम्॥
४९॥

इन्दीवरदलनेत्रं श्यामलमिन्दुवक्त्रम्
मन्मानसकृतपादं मघवदृदावानिम्॥
विपद्विनाशनदक्षं सूर्यचन्द्राग्निनेत्रम्
वन्दे परमेश्वरं तं योगिभिध्यानगम्यम्॥६०॥
कालीमर्दनकरं पूतनाप्राणहारकम्॥
यमलार्जुनशापघ्नं वन्दे तं जगदीश्वरम्॥६१॥
अनेकदैत्यहन्तारं गोवर्द्धनधरं हरिम्॥
दैत्यारिं मातुलघ्नं वन्दे तं राधिकाप्रियम्॥६२॥
वसुदेवप्रियकरं देवक्यानन्ददायकम्॥
अच्युतं केशवं विष्णुं वन्देऽहं जगदीश्वरम्॥६३॥
कोटिकन्दर्पलावण्यं गोपवेषधरं विभुम्॥
राधिकेशं रासप्रियं वन्देऽहं जगदीश्वरम्॥६४॥
वंशीधरं धेनुपालं गोपालं वनचारिणम्॥
गोपैः सह रासकरं वन्देऽहं रमणाप्रियम्॥६५॥
दामोदरं नन्दसूनुं यशोदाचित्तमोहनम्॥
अघघ्नं शङ्खचूडारिं वन्देऽहं जगदीश्वरम्॥६६॥

वृन्दावनचरं नित्यं शक्रमानापहारिणम्॥
वर्षाकोपनिरुद्धकं वन्दे तं जगदीश्वरम्॥६७॥
वंशीवादनरसासक्तं परमानन्ददायकम्॥
रासक्रीडनसंसक्तं वन्देऽहं जगदीश्वरम्॥६८॥
शंखचक्रहस्तं शार्ङ्गपाणिं पद्महस्तं गदाधरम्॥
श्रीवत्सुतं भद्रकरं वन्देऽहं जगदीश्वरम्॥६९॥
गोपमुख्यं गोपालकं गोपीप्रीतिपरायणम्॥
गोपीवस्त्रहरं गोपं वन्देऽहं जगदीश्वरम्॥७०॥
धर्मराजसंस्तुतं च भीमसेनकृतादरम्॥
अर्जुनज्ञानदातारं वन्देऽहं जगदीश्वरम्॥७१॥
जरासंधनिहन्तारं शिशुपालवधकरम्॥
विप्रसौभाग्यदातारं वन्देऽहं जगदीश्वरम्॥७२॥
देवकीवसुदेवस्य सुखप्रदर्शनपरम्॥
मनोमोहनिहन्तारं वन्देऽहं जगदीश्वरम्॥७३॥
गोकुलेशं गोपिकेशं गोसेवापरायणम्॥
गवांरक्षाकरं नित्यं वन्देऽहं जगदीश्वरम्॥७४॥

अच्युतं केशवं रामं कृष्णं हरिम्,
श्रीधरं केशवं मातुलमर्दकम्॥
भक्तमोक्षप्रदं माधवं गोपालम्,
वासुदेवमहं कृष्णचन्द्रं भजे॥५॥
देवकीनन्दनं नन्दगोपालकम्,
बन्धनमुक्तिदं दर्शनसौख्यदम्॥
यमुनाश्यामलं पापघ्नं दुःखहम्,
बालक्रीडाकरं गोपवेषं भजे॥६॥
शान्तिदमर्जुनसखं पार्थमानप्रवर्धकम्॥
कुन्तीसूनुविजयदं वन्दे तं जगदीश्वरम्॥७॥
गदाधरं श्यामवर्णं राजगृहे प्रतिष्ठितम्॥
प्रतापेश्वरदेवं सदा वन्देऽहं जगदीश्वरम्॥८॥
वैकुण्ठनाथं लक्ष्मीशं सर्वज्ञं करुणापरम्।
नर-नारायणं देवं वन्दे तं जगदीश्वरम्॥९॥
पद्मनाभं पद्मकरं पद्माक्षं पद्मविष्टरम्॥
पद्मपादं पद्माकारं वन्दे तं जगदीश्वरम्॥१०॥

सदानन्दं सदातुष्टं सदा सङ्गीतदायकम्।
सदाध्यानपराधीशं वन्दे तं मुक्तिदायकम्॥८१॥
शरण्यं शरणं देवं प्रपन्नार्तिहरं प्रभुम्॥
भवसागरभीतिघ्नं वन्दे शुभ कृन्मुक्तिदम्॥८२॥
सर्वसौभाग्यवर्धनं भवभीतिविनाशकम्॥
असाध्यरोगहं वैद्यं वन्दे तं जगदीश्वरम्॥८३॥
ईश्वरं गोपतिं यशोदानन्दकम्,
पूतनामारकं कालीयमर्दकम्॥
नन्दगोपसुतं राधिकाराधितम्
मुरलीवादकं श्यामलं तं भजे॥८४॥
सद्धर्मपराङ्मुखोऽहं बुद्धिहीनो विशेषतः॥
चरित्रहीनो दुष्टश्च वन्दे तं जगदीश्वरम्॥८५॥
पापकर्मी पराधीनः सदा सज्जननिन्दकः॥
विषयसक्तमानसः वन्दे तं जगदीश्वरम्॥८६॥
दुस्तरसागरमग्नो लम्पटश्च बहिर्मुखः॥
दुष्टचित्तो निन्दकश्च कथं त्वामर्चयाम्यहम्॥८७॥

संसारसर्पसंदष्टो धर्मभ्रष्टः कुमार्गगः ॥
स्वकीयधर्मविमुखो वन्दे तं पथप्रदर्शकम् ॥ ८८ ॥
विवेकधैर्यरहितोऽसत्यभाषी निरन्तरम् ॥
दुष्टमतिः कुमार्गस्थो वन्देऽहं करुणापरम् ॥ ८९ ॥
मायाग्रस्तो मतिभ्रष्टो विश्वमायाविमोहितः ॥
विभ्रमयमसमावृतो वन्देऽहं जगदीश्वरम् ॥ ९० ॥
धर्मिष्ठानां द्रोहकरः साधूनां निन्दकः सदा ॥
पापिष्ठानां सहचरो वन्देऽहं तं सत्यव्रतम् ॥ ९१ ॥
श्रीपतिं राघवं पितृवाक्पालकम्,
जानकीवल्लभं लक्ष्मणसेवितम् ॥
भक्तिदं मुक्तिदं शबरीपूजितम्,
भरतस्याग्रजं रामचन्द्रं भजे ॥ ९२ ॥
इति हण्डूजातीयेनार्जुनेन धर्मार्थकाममोक्षप्रदं
सर्वसिद्धिकरं भगवतो विष्णोर्निर्मितं स्तोत्रं
सम्पूर्णम्
॥ ॐ ॥
॥

अथ दशावतार स्तुतिः॥

ॐ मत्स्यः कूर्मो वराहश्च नरसिंहश्च वामनः॥
रामो रामश्च कृष्णश्च बुद्ध कल्किस्तथैव च॥१॥
एतानि दशनामानि प्रातःकाले तु यः पठेत्॥
मुच्यते सर्वपापेभ्यो विष्णुलोके स गच्छति॥२॥

o ——— o ——— o

शुभंभू॥

मत्स्यरूपधरो विष्णुः सर्वज्ञानमयः प्रभुः॥
मधुकैटभसंहर्ता प्राप्तवेदः प्रसीदतु॥१॥
मथ्यानमन्दरधरो कूर्मरूपधरो हरिः॥
देवानां च हितार्थाय जनार्दनो मां रक्षतु॥२॥
भूमिसमुद्धारणपरो वाराहोऽमितविक्रमः॥
दंष्ट्राग्रे भूसमुद्धर्ता हिरण्याक्षारिः पातु माम्॥३॥
हिरण्यकशिपुहन्ता प्रह्लादस्याभयप्रदः॥
सर्वलोकदुःखहरो नृसिंहः पातु मां सदा॥४॥
अदितिप्रियसत्पुत्रः कश्यपानन्दवर्धकः॥
देवसंतोषसंलग्नः पातु मां वामनः सदा॥५॥

सर्वदेवहितार्थाय क्षत्रियानां विनाशकः॥
महाबलो जामदग्न्यः परशुपाणि मां रक्षतु॥६॥
दशग्रीवादिदुष्टानां दानवानां विनाशकः॥
सज्जनरक्षको रामः पातु मां जानकीपतिः॥७॥
कंसादिदुष्टचित्तानां निहन्ता मुरलीधरः॥
पार्थज्ञानवित्तप्रदः मां पातु वंशीवादकः॥८॥
बुद्धावतारे संवेत्ता सन्मतिज्ञानवर्धकः॥
शान्तरूपः स्वयं विष्णुः पातु मां मार्गदर्शकः॥९॥
कलेः कलंकदोषघ्नः कुटिलानां सुबुद्धिदः॥
शरण्यो दीनचित्तानां कल्किरवतु मां सदा॥१०॥
श्रीश्वरं श्रीप्रियं सुजगत्स्वरूपम्,
शान्तिदं दुःखघ्नं मोक्षदमीश्वरम्॥
सकलं निष्कलं विमलं निर्गुणम्,
अव्यक्तमचिन्त्यं भजेऽहं सुरेशम्॥१०३॥
संसारसागरे मग्नं शरण्यं शरणार्थिनम्॥
त्वां विना कः समुद्धर्ता मां ब्रूहि करुणाकर॥१०४॥

आपादपादपृष्ठैर्बिद्धं महापापिनं दुष्टधीम् ॥
नतमस्तं सदा पार्श्वे रक्ष मां करुणाकर ! ॥१०५॥
दीनानां चातुराणां त्वं सदा कष्टनिवारक ! ॥
इत्थं मां पापमेघस्थं दयां कुरु दयाकर ! ॥१०६॥
इत्येवं गुम्फितं [illegible] स्तोत्रं सूत्रे सद्भावमौक्तिकम् ॥
इमां पुष्पाञ्जलिं देव ! गृहाण जगदीश्वर ! ॥१०७॥
भक्तिश्रद्धा ~~अर्जुनेन~~ भावपूर्णमुक्तं स्तवमल्पधिया ॥
श्रीकृष्ण भक्तवत्सल ! सदा त्वं करुणाकर ! ॥१०८॥
इत्थं भगवतो विष्णोः स्तोत्रं मन्दधिया मया ॥
रचितं यदि पश्यन्ति हसन्ति सुधियो मयि ॥१०९॥
असारं विश्वाब्धिं विविधदुःखपूर्णं भयप्रदम् ॥
दुराधिग्रस्तोऽहं कथमहं तरिष्यामि वद माम् ॥
खलस्य दीनस्य विषयभुजगाक्रान्तमनसः
न जाने कावस्था मम व्यसनसक्तस्य भवति ॥
अर्जुनेन भक्तिपूर्णं स्तोत्रं मन्दधिया कृतम् ॥११०॥
श्रीकृष्ण भक्तप्रिय ! सदा त्वं करुणार्णव ! ॥

इति हण्डू जातीयेन अर्जुन [illegible] [illegible] भगवतो [illegible] स्तोत्रं समाप्तम् ॥

ॐ नमः शिवाय

अथ श्रीशिवस्तोत्रम्॥

सृष्टिस्थितिलयकरं प्राणेश्वरं सर्वेश्वरमीश्वरम्,
सर्वोपत्तिनिवारकं पशुपतिं गङ्गाधरं शंकरम्॥
मृत्युभीतिहरं भवं त्रिनयनं श्रीशैलजावल्लभम्,
दुःखाब्धौ पतितो महाभयहरं मृत्युञ्जयं भावये॥१॥
भवसंसारसिन्धौ पीडितं व्याधिसङ्घैः
विषयरसविलोलं सम्भ्रमं कर्मपाशैः॥
भवभयदुःखभीतं खादितं कालसर्पैः
भवज्वरपरितप्तं रक्ष मां पार्वतीश॥२॥
शान्तिस्वरूपं परमं कृपालुम्,
नागेन्द्रहारं ममरेशवन्द्यम्॥
करुणानिधिं शाश्वतं महेशम्,
गुरुं शिवं तं हृदये स्मरामि॥३॥
त्वामादिदेवं वरदं वरेण्यम्
गौरीपतिं तामभुजेक्षणं च॥
श्रीवामदेवं च शरणं शरण्यम्,
गुरुं शिवं तं मनसा स्मरामि॥४॥

समुद्रतीरे लिंगमूर्तिं भवम्,
श्रीरामवन्द्यं भवहं दयालुम्॥
रामेश्वराख्यं जगदीश्वरं त्वम्
गुरुं शिवं तं शिरसा नमामि॥५॥
नमः शिवाय देवाय सुरेशाय नमो नमः॥
धर्माणां बीजरूपाय नमस्ते परमेश्वर!॥६॥
त्वं प्रभुः सर्वदेवानां त्वं सदा यज्ञकारणम्॥
त्वं मूलं सर्वधर्माणां नमस्ते शिवशंकर!॥७॥
सर्वज्ञं च भगवन्तं सर्वलोकमहेश्वरम्॥
सर्वशक्तिमयं देवं वन्देऽहं परमेश्वरम्॥८॥
अहेतुकस्नेहकरं मनःशान्तिप्रदं परम्॥
सिताङ्गं ध्यानमग्नं च वन्देऽहं परमेश्वरम्॥९॥
शम्भुं शिवं शंकरं च शूलहस्तं शिवाप्रियम्॥
शशिचूडं शितिकण्ठं वन्देऽहं परमेश्वरम्॥१०॥
कपालिनं कालकालं कामारिं करुणानिधिम्।
कैलासवासिनं देवं वन्देऽहं परमेश्वरम्॥११॥

नग्नं चर्म पराधीनं नर्तकं नृत्यवल्लभम्॥
नागैः शोभितसर्वाङ्गं वन्देऽहं परमेश्वरम्॥१२॥
जगद्गुरुं शिवं शान्तं ध्यानगम्यमुमापतिम्॥
भवभीतिहरमीशं वन्देऽहं परमेश्वरम्॥१३॥
भक्तिवश्यं भक्तप्रियं भक्तानां भयनाशकम्॥
आर्तानामार्तिहन्तारं वन्देऽहं परमेश्वरम्॥१४॥
योगिभिर्वन्दितं देवं सदा ध्यानपरायणम्॥
सद्योजातं योगीन्द्रं च वन्देऽहं परमेश्वरम्॥१५॥
कृपालुं करुणामूर्तिं त्र्यम्बकं शूलहस्तकम्॥
गङ्गाधरं चन्द्रचूडं वन्देऽहं परमेश्वरम्॥१६॥
गिरिजायाः पतिं देवं त्रिनेत्रं भक्तवत्सलम्॥
कैलासवासिनं नित्यं वन्देऽहं परमेश्वरम्॥१७॥
अजमव्यक्तममूर्तिं निर्विकारं निरंजनम्॥
अनन्तं शाश्वतं व्यक्तं वन्देऽहं परमेश्वरम्॥१८॥
भवं शर्वं पशुपतिं रुद्रं भीमं सदाशिवम्॥
पार्वतीप्राणनाथं च वन्देऽहं परमेश्वरम्॥१९॥

अचिन्त्यं परमेशानमगोत्रमजं विभुम्॥
अनन्यभक्तिसंचिन्त्यं वन्देऽहं परमेश्वरम्॥२०॥
स्वयम्भुवं लिङ्गमूर्तिं यमभयनिवारकम्॥
शरण्यमघहन्तारं वन्देऽहं परमेश्वरम्॥२१॥
कालज्ञं कालहन्तारं कालकालं मृत्युंजयम्॥
कालरूपधरं भीमं वन्देऽहं परमेश्वरम्॥२२॥
वृषाङ्कं वृषभकेतुं वृषपृष्ठस्थं सुकामदम्॥
पंचवक्त्रं त्रिनयनं वन्देऽहं परमेश्वरम्॥२३॥
वाराणसीकृतवासं गोकर्णरमणप्रियम्॥
विश्वेश्वरं विश्वनाथं वन्देऽहं परमेश्वरम्॥२४॥
जटाधरं भस्मलिप्तं जलधाराप्रियं हरम्॥
बिल्वपत्रैः सुसंतुष्टं वन्देऽहं परमेश्वरम्॥२५॥
गौरीश्वरं गौरवर्णं गौरीपादनिषेवितम्॥
गौरीप्रियं सिताङ्गं तं वन्देऽहं परमेश्वरम्॥२६॥
भैरवं भैरवेशानं भैरवगणसेवितम्॥
भैरवाष्टकसंयुक्तं वन्दे स्वच्छन्दभैरवम्॥२७॥

सामप्रियं गीतपरं सर्वज्ञं डुमरुकरम् ॥
स्वरलयतत्वज्ञं च वन्देऽहं परमेश्वरम् ॥२८॥
हरं तं परमेशानं ज्वलन्तं तपसा शिवम् ॥
महेश्वरं शुद्धदेहं वन्देऽहं शूलपाणिकम् ॥२९॥
कपालमालाभरणं नटन्तं चन्द्रशेखरम् ॥
धवलं सुजटाजूटं वन्दे वासुकिभूषणम् ॥३०॥
उमापतिं पशुपतिं सर्वलोकपतिं प्रभुम् ॥
पन्नगभूषणं देवं वन्देऽहं गिरिजापतिम् ॥३१॥
देवाधिदेवमीशानं शंकरं शशिमौलिनम् ॥
प्रपन्नार्तिहरं रुद्रं वन्देऽहं पार्वतीपतिम् ॥३२॥
त्रिनेत्रममरपूज्यमरमकष्टनाशकम् ॥
अमरैः सेवितमीशं वन्देऽहं परमेश्वरम् ॥३३॥
दिगम्बरं नीलकण्ठं सर्पहारविभूषितम् ॥
भक्तावरप्रदं देवं वन्देऽहं वरहस्तकम् ॥३४॥
विश्वेश्वरं विश्ववन्द्यं विश्वकारणकारणम् ॥
सृष्टिस्थितिनाशकरं वन्देऽहं परमेश्वरम् ॥३५॥

महारुद्रं रौद्ररूपं श्मशानभूमिचारिणम्॥
कालघ्नं कपालमालं वन्देऽहं कालवन्दितम्॥३६॥
नीलकंठं विषभक्षं मृत्युभयविनाशकम्॥
विश्वरक्षाकरं शम्भुं वन्देऽहं परमेश्वरम्॥३७॥
नटवेषधरमीशं डमरुवादनप्रियम्॥
प्रसन्नं ताण्डवकरं वन्देऽहं परमेश्वरम्॥३८॥
सुमुखवदनं देवं केशकपालधारिणम्॥
अर्धचन्द्रधरं देवं वन्देऽहं जह्नवीधरम्॥३९॥
वृषवाहं वृषध्वजं वृषारूढमुमापतिम्॥
शुभाङ्गं विमलं स्थाणुं वन्देऽहं परमेश्वरम्॥४०॥
सोमसूर्याग्निनयनं गजकृत्तिपरिवृतम्॥
सिंहचर्मापविष्टं तं वन्देऽहं परमेश्वरम्॥४१॥
दशास्यपूजितं देवं लङ्काधिपवरप्रदम्॥
लङ्कविनाशकमीशं वन्देऽहं परमेश्वरम्॥४२॥
शिरःपुष्पार्चितपदं दशग्रीवजयकरम्॥
पौलस्त्यसर्वस्वप्रदं वन्देऽहं परमेश्वरम्॥४३॥

नमामि शूलधरपादपंकजम्,
करोमि श्रीशंकरपूजनं हृदा॥
वदामि तन्नाम निरर्गलं हृदा,
स्मरामि मूर्तिधरतत्वमव्ययम्॥ ४४॥
हरं तं परमेशानं ज्वलन्तं तेजसा शिवम्॥
कपालिनं शुद्धकायं वन्दे तं शूलधारिणम्॥४५॥
नटन्तं रुद्राक्षधरं भस्माङ्गं नागभूषिणम्॥
काषितकेशमूर्धानं नीलकण्ठं नमाम्यहम्॥४६॥
पशुपतिमुमानाथं विश्वनाथं विश्वेश्वरम्॥
गङ्गाधरं लोकनाथं वन्देऽहं परमेश्वरम्॥४७॥
देवाधिदेवं देवेशमीश्वरं शरणार्थिनम्॥
प्रपन्नार्तिहरं रुद्रं वन्देऽहं पार्वतीपतिम्॥४८॥
नटराजं राज्यप्रदं विश्वसंरक्षणपरम्
महेश्वरं नर्तकेशं वन्देऽहं परमेश्वरम्॥४९॥
त्रिपुरघ्नं त्रयीमूर्तिं त्रिलोकजनसेवितम्॥
त्रिकालज्ञं त्रिनयनं वन्देऽहं परमेश्वरम्॥५०॥

त्रिजगत्स्वामिनमीशं तत्वज्ञं त्रिगुणात्मकम्॥
अपर्णासहितं देवं वन्देऽहं परमेश्वरम्॥५१॥
पूर्णं पूरयितं पुण्यं पवित्रं परमास्पदम्॥
आदिमध्यान्तरहितं वन्देऽहं परमेश्वरम्॥५२
निर्मलं निर्गुणं नित्यं नित्यानन्दं निरामयम्॥
निष्कलंकं निराभासं नमामि तं निरंजनम्॥५३॥
जितेन्द्रियं जितप्राणं जितमन्त्रं जयप्रदम्॥
जाप्यं जयकरं शम्भुं जपामि विजयेश्वरम्॥५४॥
भवं भवानीसहितं भवभयनिवारकम्॥
भवसागरसंतोतं वन्देऽहं परमेश्वरम्॥५५॥
शर्वाणीसहितं शर्वं शंकरं च शिवापतिम्॥
शिवं शाश्वतं शिवं वन्देऽहं शाम्भवीपतिम्॥५६॥
पूरकं पुराणं परं प्रत्यक्षं पुरुषोत्तमम्॥
मनोरथपूर्तिकरं वन्देऽहं परमेश्वरम्॥५७॥
अमरमजरमरपूज्यं ममर जीवनप्रदम्॥
अमरेशं मोक्षप्रदं वन्देऽहं परमेश्वरम्॥५८॥

शिवत्वाग्रे संस्थितं देवं भक्तानां मोक्षदायकम्॥
वरहस्तं महादेवं वन्देऽहं परमेश्वरम्॥५९॥
हरमुखश्रृंगपृष्ठे कृतावासं हरिप्रियम्॥
भक्तानां मोक्षदातारं वन्देऽहं परमेश्वरम्॥६०॥
संसारकूपपतितं विषयग्रस्तमानसम्॥
तापत्रयाग्निदग्धस्य त्वदन्यः कोऽवितुं क्षमः॥६१॥
अस्मिन्नसारे संसारे लीनं मन्दमतिं रवलम्॥
भगवंस्त्वं मां त्वरितं दयां कुरु दयाकर॥६२॥
जपञ्छिव शिवेतीति भवभीतो जडो जनः॥
लभते न पुनर्भवं सत्यमेव न संशयः॥६३॥
जिह्वाग्रे वर्तते यस्य शिव इत्यक्षरद्वयम्॥
शिवलोकं समासाद्य सत्यं मुक्तो भविष्यति॥६४॥
शिवनामपराः ये स्युर्घोरदुःखप्रपीडिताः॥
ते नराः परमां मुक्तिं लभन्ते नात्र संशयः॥६५॥
शिव! सतीश! गौरीश! महादेव! महेश्वर!॥
वदन्ति ये सदा भक्त्या नहि तान् कोऽपि बाध्यते॥
॥६६॥

पार्वतीप्रिय! गौरीश! मुक्तिमुक्तिविधायक॥
तापज्वरसंदग्धस्य प्रासादं कुरु मे सदा॥६७॥
भवसागरहेमग्नं भयार्तं व्याकुलाशयम्॥
कामातुरं मज्ज्यके मा पाहि मां शिवशंकर!॥६८॥
कुमतिं दुष्टं दीनं च पतितमन्धकूपके।
को नु समुद्धरेदस्मात्त्वां विना करुणाकर!॥६९॥
त्वमेव मत्समुद्धर्ता त्वमेव मदुद्धारकः॥
क्व गच्छामि परित्यज्य त्वमेव कथय प्रभो?॥७०॥
बाणरसव्योमबाणं मिते सप्तर्षिसंज्ञके॥
श्रावणमासे पूर्णिमायां गुम्फितं स्तोत्रमुत्तमम्॥७१॥
स्वबुद्ध्या गुंफितं स्तोत्रं सूत्रे मणिगणमिव॥
कौछिताभिधप्रदं सुधिया सर्वसूनुना॥७२॥
अर्जुनेन कृतां स्तुतिं यः पठेद्भक्तिमान्सुधीः।
शिवलोकं समासाद्य शिवेन सह मोदते॥७३॥
लोककल्याणहेतवे निर्मितां स्तुतिमुत्तमाम्॥
भक्त्या पठेच्छिवभक्तः सततं शिवसन्निधौ॥७४॥

अचिरेण सोऽवाप्नोति परममुत्तमं पदम् ॥

अपवर्ग गीतावलोकं [illegible] प्राप्यते वस्तुतो नात्र संशयः ॥ ७५½ ॥

इति हण्डू[illegible] जातीयेन अचिकुलोद्भवेन
रैनावारिस्थवाटिकायां वर्तमान भागज्योगी-
तंकाराख्ये मुहल्ले निवासिना श्रीसर्वानन्द-
सूनुनार्जुननाथेन निर्मितं गीतावस्तोत्रं सम्पूर्णम् ॥

समाप्तं च ॥

~~हनुमन्तु~~ सर्वजनमोहिकरं
~~सौनरल~~

सौम्यरूपं हास्यमुखं मनपंकज वासिनम्॥
~~नमस्कृत~~ सर्वजनमोहकरं वन्देऽहं मन्त्र ~~[illegible]~~ मूर्तिम्

अर्जुन नाथ हण्डू अर्जुन नाथ हण्डू
अर्जुन नाथ हण्डू

५०।६०